## अध्याय :- ५४ chapter-54 

नारद उवाच ।।[१]
ममापि पार्थ तत्रास्ति मूर्तिर्ब्राह्मणकाम्यया ।।
तत्र नाहं त्यजाम्यंन छत्रदण्ड विभूषिताम् ।। १

कार्तिकस्य तु या शुक्ला भवत्येकादशी शुभा ।।
तस्या मदर्चनं कृत्वा कलिदोषैर्विमुच्यते ।। २

अर्जुन उवाच[२] ।।
बाल्यात्प्रभृति संदेहो ममायं त्त्वदि वर्तते ।।
पृच्छतस्तं च मे विप्र न कोप्तुं कर्तुमर्हसि ।। ३

सदा त्वं मोक्षधर्मेषु परिनिष्ठां परां गतः ।।
सर्वभूतसमो दांतो रागद्वेष विवर्जितः ।। ४

त्यक्तनिंदास्तुतिर्मानी मोक्षस्यः परिकीर्त्यसे[३] ।।
त्वं च नारद लोकेषु वायुवच्चपलो मुने ।। ५

*[४]सौदामिनीव विचरन्दश्यसे प्राज्ञ संमतः ।।
सदा कलिकरो लोके निर्दयः सर्व प्राणिषु ।। ६

बहूनां हि सहस्त्राणि देवगंधर्व रक्षसाम् ।।
राज्ञां मुनीन्द्रदैत्यानां क्लेर्नष्टानि ते भवन् ।। ७

---

१ अ. श्री नारद० ।। ब. श्री नारद उ० ।।
२ अ. प्रती उवाच नास्ति ।
३ ब. ते
* ४ Folios No.314 and 315 of M.S.S.-A-are missing; therefore slokas from 6 to 53 are missing.
(सौदामिनीव विचरन्द.... भवतिचाक्षयम् )

कस्मात्तदेषा चेष्टा ते संदेहं मे हर द्विज ।।
संदेहान्न सुखं शेते बाणविद्धो मृगो यथा ।। ८

सूत उवाच ।।
शौनकेदं वचः श्रुत्वा फाल्गुनान्नारदो मुनिः ।।
प्रहसन्निव[1] बाभ्रव्यवदनं स निरैक्षत[2] ।। ९

स च बाभ्रव्यनामा वै हारीतस्यान्वायोद्भवः ।।
ब्राह्मणो नारदमुनेः समीपे वर्तते सदा ।। १०

स च ज्ञात्वा महाबुद्धिर्नारदस्य मनीषितम् ।।
प्रहसन्निव प्रोवाच फाल्गुनं स्निग्धया गिरा ।। ११

बाभ्रव्य उवाच ।।[3]
सत्यमेतद्यथात्थत्वं नारदं प्रति पांडव ।।
सर्वोऽपि चात्र वृत्तांते संशयं याति मानवः ।। १२

तदहं ते प्रवक्ष्यामि यथा कृष्णान्मया श्रुतम् ।।
स्तोककालांतरे पूर्वं सर्वं यादव नंदनः ।। १३

महीसागरयात्रायां कृष्णस्तत्रायवौ प्रभुः ।।
उग्रसेन न सहितो वसुदेवेन बभ्रुणा ।। १४

---

१ ब॰ पहरनिव
२ ब॰ निरीक्षत
३ ब॰ ब्राह्मण उ० ।।

रामेण रौक्मिणेयेन ययुधानादि ऽ भिस्तदा ।।
स च ज्ञात्वा ज्ञातिसमं महीसागर ऽ संगमे ।। १५

पिंडदानादिकं कृत्वा दत्त्वा दानानि भूरिशः ।।
गुहेश्वरादि लिंगानि यत्नतः प्रतिपूज्य च ।। १६

स्नानं कृत्वा कोटितीर्थे जयादित्यं समर्च्य च ।।
पूजयन्नारदमुनिं युक्तः कृष्णो महामनाः ।। १७

उग्रसेनेन राज्ञा वै पूर्वजेन जटायुना ।।
मयादि विप्रमुख्यानां बहूनां[1] चोपशृण्वताम् ।।
उग्रसेनो महाराजः कृष्णं प्रोवाच संसदि ।। १८

उग्रसेन उवाच ।।
कृष्ण प्रक्ष्यामि त्वामेकं संशयं वद तं मम ।। १९

यो ऽ यं नाम महाबुद्धिर्नारदो विश्ववंदितः ।।
कस्मादेषो ऽ ति चपलो वायुवद्भ्रमते जगत् ।। २०

श्री ऽ कृष्ण उवाच ।।[2]
सत्यं राजंस्त्वया पृष्टमेतत्सर्वं वदामि ते ।।
दक्षेण तु पुरा शप्तो नारदो मुनिसत्तमः ।। २१

---

१ ब यदूनां
२ ब. श्रीभगवानुवाच ।।

सृष्टिमार्गात्सुतान्वीक्ष्य नारदेन विचालितान् ।।
नावस्थानं च लोकेषु भ्रमतस्ते भविष्यति ।। २२

पैशुन्य वक्ता च तथा द्वितीयानां प्रचालनात् ।।
इति शापद्वयं प्राप्य द्विविधात्मज चालनात् ।। २३

निराकर्तुं समर्थो ऽपि मुनिर्मेने तथैवतत् ।।
एता वान्साधुवादो हि यतश्चैव क्षमते[1] स्वयम् ।। २४

विनाशकालं चावेक्ष्य कलिं वर्धयते यतः ।।
सत्यं च वक्ति तस्मात्स न च पापेन लिप्यते ।। २५

भ्रमतो ऽपि च सर्वत्र नास्य यस्मात्पृथङ् मनः ।।
ध्येयाद्भवति नैव स्यादभ्रमदोषस्ततोस्य च ।। २६

अहं हि सर्वदा स्तौमि नारदं देवदर्शनम् ।।
महेंद्रगदितेनैव स्तोत्रेण श्रृणु तन्नृप ।। २७

श्रुतचारित्रयोर्जाता यस्यार्हता न विद्यते ।।
अगुप्तश्रुत चारित्रं नारदं तं नमाम्यहम् ।। २८

---

१ ब. क्षमतेश्वरः

अरतिक्रोध चापल्ये भवं नैतानि यस्य च ।।
अदीर्घसूत्रं धीरं च नारदं तं नमाम्यहम् ।। २९

कामाद्वा यदि वा लोभाद्वचं यो नान्यथावदेत् ।।
उपास्यं सर्व जंतूनां नारदं तं नमाम्यहम् ।। ३०

अध्यात्मगति तत्वज्ञं क्षांतं शक्तं जितेंद्रियम् ।।
ऋजुं यथार्थ वक्तारं नारदं तं नमाम्यहम् ।। ३१

तेजसा यशसा बुद्धया नयेन विनयेन च ।।
जन्मना तपसा वृद्धं नारदं तं नमाम्य हम् ।। ३२

सुखशीलं सुखवेषं सुभोजं स्वाचरं शुभम् ।।
सुचक्षुषं सुवाक्यं च नारदं तं नमाम्य हम् ।। ३३

कल्याणं कुरुते गाढं[1] पापं यस्य[2] न विद्यते ।।
न प्रीयते परानर्थै योऽसौ तं नौमि नारदम् ।। ३४

वेदस्मृति पुराणोक्त धर्मं यो नित्यमास्थितः ।।
प्रियाप्रिय विमुक्तं तं नारदं प्रणमाम्य हम् ।। ३५

---

१ ब. बाढं
२ ब. यस्मिन्न

अशनादिष्व लिप्तं[1] च पंडितं नालसं द्विजम् ।।
बहुश्रुतं चित्रकथं नारदं प्रणमाम्यहम् ।। ३६

नार्थे क्रोधे च कामे च भूतपूर्वो ऽस्य विभ्रमः ।।
येनैते नाशिता दोषा नारदं तं नमाम्यहम् ।। ३७

वीतसंमोह दोषो यो दृढ भक्तिश्च श्रेयसि ।।
सुनयं सत्रपं तं च नारदं प्रणमाम्यहम् ।। ३८

असक्तः सर्व संगेषु यः सक्तात्मेति लक्ष्यते ।।
अदीर्घ संशयो वाग्मी नारदं तं नमाम्यहम् ।। ३९

न त्यजत्यागमं किंचिद्यस्तपो नोप जीवति ।।
अवंध्यकालो यस्मात्मा तमहं नौमि नारदम् ।। ४०

कृतश्रमं कृतप्रज्ञं न च तृप्तं समाधितः ।।
नित्यं यत्नात्प्रमत्तं च नारदं तं नमाम्यहम् ।। ४१

न त्द्रष्यत्यर्थलाभेन यो ऽलाभे न व्यथत्यपि ।।
स्थिर बुद्धिरसक्तात्मा तमहं नौमि नारदम् ।। ४२

तं सर्वगुण संपन्न दक्षं शुचिमकातरम् ।।
कालज्ञं च नयज्ञं च शरणं यामि नारदम् ।। ४३

इमं स्तवं नारदस्य नित्यं [2]राजन्पठाम्यहम् ।।
तेन मे परमां प्रीतिं करोति मुनिसत्तमः ।। ४४

---

१ ब. लुब्धं

२ ब. राज्यन माम्यहं ।।

अन्योपि यः शुचिर्भूत्वा नित्यमेतां स्तुतिं जपेत् ।।
अचिरात्तस्य देवर्षिः प्रसादं कुरुते परम् ।। ४५

एतान्गुणान्नारदस्य त्वमथाकर्ण्य ~~[illegible]~~ पार्थिव ।।
जप नित्यं स्तवं पुण्यं प्रीतस्ते भविता मुनिः ।। ४६

बाभ्रव्य उवाच ।।[१]
इति कृष्णमुखाच्छ्रुत्वा नारदस्य गुणान्नृपः ।।
बभूव परमप्रीतश्चक्रे तच्च तथा वचः ।। ४७

ततो नारदमानर्च दत्त्वा दानं पुष्कलम् ।।
नारदीय द्विजाग्र्याणां नारदः प्रीयतामिति ।। ४८

ययौ द्वारवतीं कृष्णः सभ्रातृज्ञाति बांधवः ।।
तीर्थयात्रामिमां कृत्वा विधिवत्पुरुषोत्तमः ।। ४९

तथा त्वमपि कौरव्य नारदस्य गुणानिमान् ।।
श्रुत्वा श्रद्धामयो भूत्वा श्रृणु कृत्यं यदत्र च ।। ५०

कार्तिके शुक्लद्वादश्यां प्रबोधिन्यामसौ मुनिः ।।
विष्णोर्ध्यानि समाधिश्च प्रबुद्धो जायते सदा ।। ५१

तस्मिन्दिने नारदेन निर्मिते[२] च कूपके ।।
स्नानं कृत्वा प्रयत्नेन श्राद्धं कुर्यात्समाहितः ।। ५२

---

१ ब. प्रतौ इत्ययं पाठः नास्ति ।
२ ब. विष्णु

तपो दानं जपश्चात्र कूपे भवति चाक्षयम् ।। ५३

इदं विष्णिावति मंत्रेण ततो विष्णुं[1] प्रबोधयेत् ।।
नारदं [2]च मुनिं पश्चान्मन्त्रेणानेन पांडव ।। ५४

योगनिंद्रा यथा त्यक्ता हरिणा मुनिसत्तम ।।
तथा लोकोपकाराय भवानपि परित्यज ।। ५५

इति मंत्रेण चोत्थाप्य नारदं परिपूजयेत् ।।
कृष्ण प्रीदितया स्तुत्या छत्र धौत्रार्चनैः शुभैः[3] ।। ५६

शक्तया द्विजानां देयं च छत्रं धौत्रं[4] कमण्डलुम्[5] ।।
प्रणम्य ब्राह्मणान्भक्तया नारदः प्रीयतामिति ।। ५७

एवं कृते प्रसादात्स मुनेः पापेन मुच्यते ।।
जायते न कलिस्तस्य न चासौख्यं भवेदिह ।। ५८

[6] इति श्री स्कांदे..... नारदमाहात्म्यं वर्णनं नाम चतुःपंचाशत्तमोऽध्यायः ।।

---

१ ब. 'वि'
२ ब. नारदश्चैव
३ अ. शुभैः
४ ब. धौत्रं
५ अ. कमंडलु
६ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे नारद माहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे नारद माहात्म्यं षटपंचशोऽध्यायः ।।
(Actually it is 54th Chapter)